International Journal of Sanskrit Research 2020; 6(5): 158-160

International Journal of Sanskrit Research
अनन्ता

ISSN: 2394-7519
IJSR 2020; 6(5): 158-160
© 2020 IJSR
www.anantaajournal.com
Received: 26-07-2020
Accepted: 28-08-2020

**नन्दिता गाइन**
सहकारी अध्यापिका, संस्कृत विभागः, बोलपुर कॉलेज, बोलपुर, बीरभूम, वेस्ट बंगाल, भारत

**Corresponding Author:**
**नन्दिता गाइन**
सहकारी अध्यापिका, संस्कृत विभागः, बोलपुर कॉलेज, बोलपुर, बीरभूम, वेस्ट बंगाल, भारत

# हस्तिमल्लविरचितस्य विक्रान्तकौरवनाटकस्य रसविवेचनम्-एकमध्ययनम्

**नन्दिता गाइन**

## प्रस्तावना

रमणीयं चित्तानन्दजनकं शब्दार्थयुगलमेव काव्यम्। तत्र विशेषार्थः प्रतिपादकः शब्दः एव कवेः काङ्खितो भवति। तत् विशेषः विषयः कः इति प्रश्नस्योत्तुरं किं भवतीति विषयोऽपि गृहीत्वा संस्कृतसाहित्ये महती आलोचना विद्यते। तत्र केचन काव्ये अलंकारस्य प्राधान्यं स्वीकुर्वन्ति, केचन गुणाः काव्यस्य मूलं गृह्णाति, केचन, रीतिं, ध्वनिं वा काव्यस्य मूलभुतं इति मन्यते। काव्ये ये जनाः रसस्य प्राधान्यं स्वीकुर्वन्ति ते संख्या गरिष्ठाः भवन्ति। तेषां मतानुसारेण रसः एव काव्यस्य प्राणभूतं उपादानम्। सः रसः काव्यामृतं वितनोति। रसप्रसङ्गे संस्कृतकाव्यशास्त्रेषु विविधाः मतविषयाः प्रचलिताः सन्ति। रसस्य विचित्रस्वरूपालोचनादनन्तरम् रसविषये सहृदयजनाः वदन्ति यत् - रसः आनन्दानुभूतेरखण्डभाण्डारः। चित्तानन्द-चिन्मयः स्वरूपः रसः ब्रह्मास्वादसहोदरः इति। लोकोत्तरचमत्कारमयः रसः काव्यानन्दस्य मूलभूतं विषयः चेति।
साधारणतया रसशब्देन शृङ्गारादिरसानां प्रतीतिर्जागरिता भवति। तत्सिन्नेवार्थे नाटककारस्य हस्तिमल्लविरचितस्य विक्रान्तकौरवस्य रसविरारः एव अस्य गवेषणापत्रस्य विषयः।
नाटककारः हस्तिमल्ल दाक्षिणात्यप्रदेशस्य विशिष्टः व्याक्तित्वरासीत्। तस्य समयः त्रयोदशशतकं भवितुमर्हति। तस्य चत्वारि रूपकाणि उपलभ्यन्ते। तानि यथा--
'विक्रान्तककौरवम्', 'मैथिलीकल्याणम्', 'अञ्जनापवनञ्जयः' 'सुभद्रा' चेति। एतेषुं रूपकेषु 'विक्रान्तकौरवम्' हस्तिमल्लस्य श्रेष्ठः साहित्यकीर्तिः। षष्टाङ्कविशिष्टे नाटकेऽस्मिन् जैनधर्मानुसारेण भगवान् बृषभदेवस्य चतुरशीतितमगणधरेषु एकसप्तति तम गणधर जरकुमारस्य जीवनवृत्तान्तमुपजीव्यते। एतद्वृत्तान्तं जिनसेनविरचिते महापुराणेऽस्ति इति। तन्मध्ये हस्तिनापुर नृपतिपुत्रेण जयकुमारेण सह वाराणस्याः महाराज्ञः पुत्री सुलोचनायाः स्वयम्वरोत्सवः अस्य नाटकस्य विषयः।
नाटकेऽस्मिन् हस्तिमल्लस्य नाट्यविषयोपस्थापना यादशी सुसंबद्धा, तादृशी अस्त्यत्र काव्यात्मिका चिन्ता। नाटकस्य विषयस्थापनायां नाट्यतत्त्वगतस्य नियमाः अत्र परिलक्ष्यते। अस्मिन्नेवावसरे अस्य नाटकस्य रसविचारः हस्तिमल्लेन कीदृशः कृतं तदेव विषयमुपरि आलोकपातमेव अस्य गवेषणापत्रस्य उद्येश्यम्।

'विक्रान्तकौरवम्' नाटकस्य अङ्गीरसः शृङ्गारः तथा वीररसः अङ्गश्चेति।

काव्यनाटकेषु रसस्थिति नोपेक्षते। अयमेव रसः भावव्यञ्जकः। आचार्य भरतेन रसतत्त्वे भावस्य गुरुत्वं स्वीकृतम्। यतः काव्यनिर्माता काव्योपभोक्ता च काव्यरसास्वादने भावतन्मयचित्तौ भवतः। तस्मात् रसप्रतिपादने भावस्य गुरुत्वमनस्वीकार्यम्। भरतेनोक्तं नाट्यशास्त्रे ---

'न भावहीनोऽस्ति रसो न भावो रसवर्जितः।
परस्परकृता सिद्धिस्तयोरभिनये भवेत।।[१]

अर्थात् भावरसयोर्मध्ये सम्पृक्तः सम्पर्कोऽस्ति, यस्तु अभिनयमाध्यमेन प्रस्फुटितो भवति। आचार्य भामहेन काव्येषु अर्थः, लोकव्यवहारः तथा उपदेशस्य रसयुक्तं भवतीति स्वीकृतम्। तेनोक्तम् काव्यालंकारे ---

'चतुर्वर्गाभिधानेऽपि भूयसार्थोपदेशकृत्।
युक्तं लोकस्वभावेन रसैश्च सकलैः पृथक।'[२]

रसः आस्वाद्यः भवति। भ्रमराः यथा पुष्पेभ्यः मधुधारां पिवन्ति तथैव काव्यतृष्णार्तः सहृदयजनः काव्यामृतम् आस्वादयति। काव्यस्य आस्वाद्यमानत्वं स्वीक्रीय आचार्यदण्डिना उक्तं ---

'मधुरं रसवद् वाचि वस्तुन्यपि रसस्थितिः।
येन माद्यन्ति धीमन्तो मधुनेव मधुव्रताः।।'[३]

रसः काव्यस्यान्तरङ्गभूतः विषयः। यद्यपि काव्येषु नाटकेषु वा एतदतिरिक्तोऽन्येसामपि विषयानां सन्निवेशं परिलक्ष्यन्ते, तथापि ते विषयाः पर्यायक्रमे रसे एव पर्यवसिता भवन्ति। नाटकेषु पात्राणां भावसमूहात् रसस्योत्पत्तिर्जायते। भावः किम् इति वक्तुकामः सन् आचार्येन उक्तम् तस्य ग्रन्थे --

'विभावैराहतो योऽर्थस्त्वनुभावेन गम्यते।
वागङ्गसत्त्वाभिनयैः य भाव इति संज्ञितः।।'[४]

नाट्यशास्त्रस्य षष्ठोऽध्याये रसतत्त्वं आलोचितमस्ति। रसः शब्दस्य व्यापकार्थत्वं ब्रह्मास्वादसहोदरं भवति, यस्तु अलौकिकं आनन्दानुभूतिं प्रकटयति। रसः शब्दस्य साधारणोऽर्थः शृंगारादिषु रसेसु पर्यवसितः। नाट्यशास्त्रे अष्टरसाः उल्लेखिताः सन्ति। मम्मटाचार्येण नवरसं स्वीकृतम्। रसभेदान् प्रदर्शयन् साहित्यदर्पणकारेण उक्तम् –

'शृङ्गार-हास्यकरुणरौद्रवीरभयानकाः।
वीभत्सोऽद्भुत इत्यष्टौ रसाः शान्तस्तथामतः।।'[५]

नाटकेषु शान्तरसस्य अस्तित्वं केचित् पण्डिता न स्वीकुर्वन्ति। परन्तु आचार्य मम्मटः, आचार्य जगन्नाथः, आचार्य विश्वनाथः प्रमुखा पण्डिताः नाट्ये शमयुक्त-शान्तरसस्य स्थितिः स्वीकुर्वन्ति।
हस्तिमल्लविरचितस्य विक्रान्तकौरवनाटकस्य मूलरसः शृङ्गारः, अङ्गरसः वीरः तथा अस्मिन्नाटके रौद्र, अद्भुत-हास्य-रसानामपि प्रयोगः दृश्यते।

एतदतिरिक्तं नाटकस्यान्तिमे अङ्के शान्तरसस्यापि प्रतीतिर्जायते।

नाटकस्य विषयमवलम्ब्य एव नाटके रससञ्चारः भवति। यतः अस्मिन् नाटके सुलोचनायाः स्वयम्बर दृश्यं प्रधानतया वर्णितं जातम्, अपि च जयकुमारेण सह सुलोचनायाः प्रणयवृत्तान्तं दृश्यते, तस्मात् कारणादत्र शृङ्गारस्य प्रकाशं परिलक्षितं भवति। शृङ्गाररसस्य भेदविषय उच्यते -- 'तस्य द्वे अधिष्ठाने सम्भोगो विप्रलम्भश्च'। विक्रान्तकौरवनाटके अधिकाधिकरूपेण विप्रलम्भशृङ्गारस्य अपूर्व वर्णना दृश्यते। सा वर्णना अतीव रमणीया। तत्र नायिकायाः अदर्शने नायकहृदयस्य उत्कण्ठाप्रकटीकरणाय कविना हस्तिमल्लेन विप्रलम्भशृङ्गारस्य प्रयोगवैचित्र्यं साधितम्। यत्र रतिः अभीष्टं न प्राप्नोति तत्र विप्रलम्भशृङ्गारः भवति। अत्र अभीष्टलाभाभावे जनस्य हृदयं कामभावेन उत्कण्ठिता भवति। नाटके जयकुमारस्य उत्कण्ठां प्रदर्शयन् हस्तिमल्लेन उक्तं यत् ---

'संकल्पशतविधुरित धैर्यपरिस्खलनजातवैलक्ष्यः।
लक्ष्यीकृतः शराणां निसर्गकठिनेन मदनेन।।'[६]

अत्र राज्ञः जयकुमारस्य सुलोचनायाः कृते चित्तचाञ्चल्यं परिदृश्यते। विप्रलम्भशृङ्गाररसस्य प्रयोगे नाटककारः सिद्धहस्तः। तस्य वर्णनाचातुर्य्यं अनवद्य रूपेण प्रतिभाति। नाटकस्य पञ्चमाङ्के राज्ञः जयकुमारस्य उत्कण्ठाम् अधिकरूपेण परिलक्ष्यते। तत्र राज्ञः प्रलापवचनं व्यनक्ति। तत्तु अतीव चमत्कारत्वं रसोद्बोधकं चानुभवं जनयति। तत्र राजा जयकुमारः वदति ---

'किमपकृतममुष्य चक्रवाकैः किमुपकृत तुहिनार्चिषश्चकोरैः,
व्यथयति विघटय्य चक्रवाकांस्तृषमपहृत्य धिनोति यच्चकोरान्।।'[७]

उदाहरणेऽस्मिन् चन्द्रमुद्दिश्य राज्ञः खेदोक्तिः सूचितम् हस्तिमल्लेन। अत्र राज्ञः कामप्रलापं प्रकटितम् व्यञ्जनामाध्येमेन, तत्तु अतीव रमणीयम् अभवत्। यत्र तु सम्भोगशृङ्गारस्य प्रयोगं दृश्यते, तत्र कामकृता रतिजन्या दशदशाः दृश्यते। तत्तु --

'अभिलाषश्चिन्तास्मृतिगुणकथनोद्वेगसंप्रलापाश्च।
उन्मादोऽथ व्याधिर्जडतामृतरिति दशात्र कामदशाः।।'[८]

अथ प्रलावचनं कामीजनानां स्वभावसिद्धः विषयः। अस्मिन्नाटके नायकस्य अपरं प्रलापनिदर्शनं यथा ---

'त्वमसि शिशिररश्मिः सन्निधौ शीतलाङ्ग्या।
यदि तदपगमे त्वं दर्शयेरद्य शैत्यम्।
अति शशधर सत्यं दर्शयिष्यामि तीक्ष्णौ
शिरसि तव शशस्य द्वौ विषाणौ विशकम्।।'[९]

निदर्शनेऽस्मिन् नायकस्य प्रलापं श्रुत्वा नाटकस्य विदूषकोऽपि विस्मितं भवति। तेन तत्रोच्यते --- 'अहो दुष्प्रारप्रसराणि कामुकजनस्य आकाशपरिदेवितानि।'[१०] महाकविना कालिदासेन अपि कामीजनानां प्रलापं समर्थयित्वा उक्तम् ---

कामार्ता हि प्रकृतिकृपणाश्चेतनाचेतनेषु'[११]

विक्रान्तकौरवनाटके विप्रलम्भ शृङ्गारस्य अपरानि निदर्शनानि यथा ---
**क.** 'इयं चेत् सृष्टा स्यादमृतनिधिनैवेन्दुवदना' (वि. १/१३)
**ख.** शृङ्गारस्य गरीयसी परिणतिर्विश्वस्य संमोहिनी' (वि. २/२४)
**ग.** 'सत्त्वं विलुप्तमिव तप्तमिवांगमंगम्' (वि. १/३३)
**घ.** 'अपांगव्यासंगस्खलदलसविभ्रांतनयनम्।' (वि. १/४०)
**ङ.** 'दुस्सहोपचितमन्मथव्यथानर्थशून्यशिशिरांशुशब्दनः।' (वि. ५/५०)
**च.** 'प्रियाविश्लेषार्ते स्मरविशिखसंपातविधुरे।' (वि. ५/५५)

नाटके नायकस्य सन्तप्तहृदयस्य उत्कण्ठां प्रकाशे विप्रलम्भ शृंगारस्य लक्षणम् आविर्भवति। अयं नाटकः यद्यपि शृङ्गारप्रधानः, तथापि तत्र सम्भोगशृंगारपेक्ष्या विप्रलम्भशृंगारस्य निदर्शनम् अधिकं दृश्यते। विप्रलम्भशृंगारेण विना सम्भोगशृंगारस्य परिपुष्टिर्न जायते। शृंगारस्य स्थायिभावः रतिः। रतिः यत्र अभीष्टलाभं न करोति, तत्र विप्रलम्भशृंगारः भवति, तत्रैव नायक-नायिकायाः प्रेमभावं प्रगाढं भवति। विरहादनन्तरम् एव अधिकं प्रणयंमुद्भासितं भवति। तत्र सन्तप्तानां हृदयावस्था प्रेमभावेन विचलिता विगलिताश्च भवति। अत्र यः भावः उद्भवति, तदेव रससञ्चारे सहकारिरूपेण आविर्भवति। तत्र विभावादि रतिरूपं स्थायिभावं स्रजति, तस्मात् रसनिष्पत्तिः भवति।
नाटकेऽस्मिन् सम्भोगशृङ्गारस्य प्रयोगमपि दृश्यते। यथा ---

'निर्वर्णितस्सस्पृहमीक्षणाभ्यां
कपोलयोः स्वादरमर्पितश्च।
न्यस्तश्च भूयः स्तनयोः सुदत्या

मुखेन कामं परिचुम्बितश्च।।'[१२] अस्मिन्निदर्शने नायकं प्रति सुलोचनायाः अनुरागं प्रकटितं भवति। सा सुलोचना नायकप्रतिबिम्बसमन्वितं दर्पणं प्रति समादरं प्रदर्शितवती। अत्र सम्भोगशृंगार किञ्चिदन्यरूपेण प्रतिभाति। सम्भोगशृंगारस्य लक्षणे साहित्यदर्पणे उच्यते ---

'दर्शनस्पर्शनादीनि निषेवेते विलासिनौ।
यत्रानुरक्तावन्योन्यं सम्भोगोऽयमुदाहृतः।।'[१३]

सम्भोगशृङ्गारे रतेरनुकुलं भूत्वा श्रवणदर्शनादि विभावेन नेत्रचातुर्य्यं, कटाक्ष-भ्रविक्षेपादि अनुभावस्य समन्वये रतिरूपस्य स्थायिभावस्योतपत्तिर्जायते। 'विभावानुभाव व्याभिचारिसंयोगाद्रस निष्पत्तिः' इति भरतचनानुसारेण तत्र शृंगाररसस्य प्रतीतिः अनुभूतिर्वा जायते। सम्भोगशृंगारस्य अपरं निदर्शनमत्र उपस्थाप्यते -- यथा --

'लब्धं किल प्रियसखी तव दुर्विमोच-
मिष्टं मया त्वमपि मुंच मुहूर्तमेनाम्।
रंमोरु देहि परिरंभसुखं सकृन्मे
तिष्ठन्तु तावदपरे तु मनोरथा नः।।'[१४]

सुखप्रायेष्टसम्पन्न शृङ्गार रसस्य प्रयोगे नाटककारः हस्तिमल्लस्य पाण्डित्यं तथा तस्य काव्यागुणात्मिका प्रतिभा प्रकाशिताऽभवत्। नाट्यवस्तुनः सम्यक् उपस्थापनार्थं नाट्यतत्त्वगतस्य उपादानस्य प्रयोगोऽपि सम्यक् दृश्यते अस्मिन्नाटके। तत्र रसछन्दालङ्काराणामपि प्रयोगः यथायथरूपेण कृत्वा नाटककारः हस्तिमल्लः तस्य नाट्यचातुर्य्या निदर्शनं प्रतिष्ठापितवान्। तस्य रसाविवेचनमपि नाट्यवस्त्वानुसारेण यथायथमभवत्। विविधकाव्यगुणैर्विभूषितं नाटकमिदं हस्तिमल्लस्य प्रतिभायाः समुत्कृष्टं निदर्शनम्। शृङ्गाररसस्य मनोहारि वर्णना सहृदयस्य पाठकजनस्य हृदयं स्पृशति। हस्तिमल्लस्य रसात्मिका पदावली स्वीयभावप्राचुर्यात् अनन्यरूपेण जनानां चित्तम् हरति आह्लादयति च।

**तथ्यसूची**

१. भरत, नाट्यशास्त्र, ६/३६
२. भामह, काव्यालंकारः, १/२१
३. दण्डी, काव्यादर्श, २/५१
४. भरत, नाट्यशास्त्र, ७/१
५. विश्वनाथकृत साहित्यदर्पण, ३/१८२
६. विक्रान्तकौरव, १/३४
७. तत्रैव, ५/२५६
८. साहित्यदर्पणम्, पृ. २५०
९. विक्रान्तकौरव, ५/८०
१०. तत्रैव, पृ.
११. मेघदूतम्, पूर्वमेघ/५
१२. विक्रान्तकौरवम्, १/२९
१३. सा. द., ३/२९७
१४. विक्रान्तकौरवम्, ५/७७

**ग्रन्थपञ्जी**

१. काव्यादर्शः, दण्डी, सम्पादकः, अनिलचन्द्र वसु, संस्कृत बुक डिपो, कलकाता, २०१०।
२. काव्यालंकारः, भामह, सम्पादकः, रमण कुमार शर्मा, विद्यानिधिप्रकाशनम्, दिल्ली, २००४।
३. दशरूपकम्, धनञ्जयः, सम्पादकः, वैजनाथ पाण्डेय, मोतीलाल बनारसी दास; १९७९।
४. नाट्यशास्त्रम्, भरताचार्य, सम्पादकः, सुरेशचन्द्र वन्दोपाध्याय, नवपत्र प्रकाशनम्, कलकाता; २०१३।
५. नाट्यशास्त्रम्, भरताचार्य, सम्पादकः, ब्रजमोहण चतुर्वेदी, हरिहर झा, आशा प्रकाशनगृहम्, दिल्ली, १९६७।
६. विक्रान्तकौरवम्, हस्तिमल्ल, सम्पादकः, पन्नालाल जैन, चोखम्वा संस्कृत सीरीज ऑफिस, बाराणसी, १९६९।
७. महापुराणम् (द्वितीय भागः), जिनसेन, सम्पादकः, पन्नालाल जैन, भारतीय ज्ञानपीठ, काशी, १९५१।
८. साहित्यदर्पणः, आचार्य विश्वनाथः, सम्पादकः, गुरुनाथ विद्यानिधि ओ धीरेन्द्रनाथ भट्टाचार्यः, संस्कृत बुक डिपो, कलकाता, २०१३।